# व्याकरणमहाभाष्ये व्याकरणाध्ययनप्रयोजनम्

**नारायणजोशी**

*उपप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः, शारदाविद्यापीठम्*

narayanbabujoshi2050@gmail.com

Orcid : https://orcid.org/0009-0005-4094-3948

https://doi.org/10.3126/anveshana.v4i1.96918

**शोधसारः**

*व्याकरणाध्ययनप्रयोजनमिति इति शीर्षकस्यालेखेऽस्मिन् व्याकराणाध्ययनप्रयोजनानां विश्लेषणं विमर्शनञ्च कृतमस्ति। पातञ्जलव्याकरणमहाभाष्ये रक्षोहागमलघ्वसन्देहाः पञ्च प्रयोजनानि त्रयोदश अप्रधानप्रयोजनानि च सन्ति। आलेखे सपुरावृत्तं संस्कृतव्याकरणस्य संक्षिप्तपरिचयं दत्त्वा व्याकरणस्य मुख्यगौणप्रयोजनानां सोदाहरणं व्याख्यानं विमर्शनं कृतमस्ति। निगमनविधिं प्रयुज्य शोधो विहितो वर्तते। तत्रैवान्यसामग्रीसङ्कलनाय भौतिकसाञ्जालिकपुस्तकालयपद्धतिः समवलम्बिता वर्तते। प्रकृतलेखस्य विषयः व्याकरणाध्ययनप्रयोजनानीति अस्ति तेनात्र विषयप्रतिपादनाय विश्लेषणविधिः प्रयुक्तो वर्तते। आलेखेऽस्मिन् रक्षोहागमलघ्वसन्देहाः मुख्यप्रयोजनानां तेऽसुराः..., दुष्टः... शब्दः...., यदधीतम्...., यस्तु प्रयुङ्क्ते...., अविद्वांशः...., विभक्तिं कुर्वन्ति...., यो वा इमाम्...., चत्वारि...., उत त्वः...., सक्तुमिव...., सारस्वतीम्...., दशम्यां पुत्रस्य...., सुदेवोऽसीति त्रयोदशानामानुषङ्गिकानां व्याकरणाध्ययनप्रयोजनानां विश्लेषणं विहितमस्ति। व्याकरणप्रयोजनेन व्याकरणाध्ययनाय प्रवृत्तिर्भवति, व्याकरणस्य महत्त्वञ्च लभ्यते। एवञ्च समाजेन सह, मानवजीवनशैल्या सह च व्याकरणप्रयोजनानि नियोज्य नवसंस्कारप्रणालीं निर्मातुं शक्यते। पातञ्जलव्याकरणमहाभाष्यानुसारं व्याकरणाध्ययनस्य पञ्च मुख्यप्रयोजनानि, त्रयोदश गौणप्रयोजनानि च सन्ति, भाषासम्पादनाय, नवज्ञानाय, व्यवहारपरिमार्जनाय च व्याकरणाध्ययनमावश्यकमित्यालेखस्य निष्कर्षः सम्पादितो वर्तते। चरमेऽनुसन्धानात्मकालेखोऽयं पाठकान् न केवलं व्याकरणस्य परिचयविषये प्रयोजनपरिचयविषये शिक्षयति अपि तु प्रयोजनानामन्तर्बोधं कारयति। असौ संस्कृतव्याकरणस्यौचित्यं प्रयोजनमात्सात्कर्तुं सुतरां प्रेरयति।*

**शब्दकुञ्जी -** रक्षा, ऊहः, आगमः, लघुः, असन्देहः

## विषयपरिचयः

जगतः केषाञ्चन वस्तूनामपि किञ्चन प्रयोजनम् अवश्यमेव भवति। यद्यपि व्याकरणस्य साक्षात् प्रयोजनं तु शब्दानामनुशासनं तथापि शब्दानुशासनस्य प्रयोजनमर्थात् किं प्रयोजनप्रयोजनमिति मनसि निधाय कानि पुनः

शब्दानुशासनस्य प्रयोजनानि ? इति प्रश्नं जागर्ति । उत्तरे च रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इत्युक्त्वा पञ्च प्रयोजनानि प्रदर्शितानि । एवञ्चागमः प्रयोजनः = प्रयोजकः इति बोध्यम् । अस्याध्ययनशीर्षकस्यापि मुख्यानुषङ्गिकभेदेन द्विधा प्रयोजने स्तः । मुख्येऽपि रक्षोहागमलघ्वसन्देहाः प्र्योजनम् (त्रिपाठी, सन् २०२२, पृ.२१) इति विदुषा पतञ्जलिना उक्तं वर्तते । पतञ्जलेः वाक्यस्यास्यान्त्ये प्रयोजनानीति भवति वा प्रयोजनमिति वा शङ्का उदञ्चति । यद्यपि द्वन्द्वसमासे रक्षा च ऊहश्च आगमश्च सन्देहश्चेति रक्षोगमलघ्वसन्देहाः भवति ततः विधेयभागे बहुवचनमपेक्षते परमत्र एकवचनमस्ति, एतदेव शङ्काविषयः । वस्तुतस्तु अत्र एकशेषकार्यं सम्भूतमस्ति । प्रयोजनी च प्रयोजनश्च प्रयोजनश्च प्रयोजनञ्चेति प्रयोजनम् भवति । पक्षे प्रयोजनानि च भवति । अत्र प्रमाणाय 'नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्' (पा.सू.१।२।६९) (पाठकः, सन् २०००, पृ. १२) सूत्रमिदम् अक्लीबेन सहोक्तं क्लीबं शिष्यते, तच्च विकल्पेनैककवद्भवति । अत्र सर्वविभक्तिषु भिन्नरूपत्वादत्र 'सरूपाणामेकशेष एकविभक्तौ' (पा.सू.१।२।६४) इति सूत्रं न प्राप्नोति । अत्र वैकल्पिकैकवद्भावकरणमपि आवश्यकमासीत् । अत एव सूत्रमिदं सार्थकञ्च सञ्जातमिति । एवञ्च एकत्वसम्पादनायात्र बहुवचने सत्यपि एकवचनस्य प्रयोगो विहितः । वेदाः प्रमाणम् (सुदर्शनाचार्यः, वि.सं.२०७३, पृ.५) इत्यत्र सर्वे चतुर्वेदाः प्रमाणाय समर्थाः सन्ति इति ज्ञानाय प्रमाणमिति एकवचनस्य प्रयोगः दृश्यते । अत्र वेदाः प्रमाणमितिवदत्रापि रक्षायाः, ऊहस्य, आगमस्य, लघोश्च पञ्चानामेव एकत्वबोधाय प्रयोजनमिति प्रयोगः कृतो वर्तते ।

विद्धातोः वेदशब्दस्य निर्माणो भवति । सत्तार्थकाद्, लाभार्थकाद् विचारार्थकाद् ज्ञानार्थकाच्च धातोः वेदशब्दः निष्पादितो वर्तते । वेदाः ऋग्यजुसामाथर्वभेदेन चत्वारः सन्ति । चतुर्णामेव वेदानां पृथक् पृथक् स्ववैशिष्ट्यं वर्तते । वेद आदिग्रन्थः मन्यते । वेदस्य विवेचनाय ब्राह्मणोपनिषद्ग्रन्थाः विरचिताः । वेदे संस्कृतव्याकरणस्य पूर्णप्रभावो दृश्यते । वैदिकलौकिकयोरूभयोरपि व्याकरणयोः सम्यक्प्रयोगो दृश्यते । वेदे बहुत्र व्याकरणपरका मन्त्राः सन्ति । वेदे व्याकरणपरकव्याख्या च लभ्यते । वेदस्य षट्स्वङ्गेषु व्याकरणं प्रधानं मन्यते ।

**छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ पठ्यते,**

**ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते ।।४१।।**

**शिक्षा ग्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्,**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोक महीयते** (शर्मा, वि.सं.२०५०, पृ.६२)।।४२।। इति पाणिनीयशिक्षायाः श्लोकानुसारं वेदस्य षट्सु अङ्गेषु छन्दः द्वौ पादौ स्तः । वेदस्य हस्तः कल्पो विद्यते । नेत्रं ज्योतिषमुच्यते । श्रोत्रन्तु निरूक्तः मन्यते । एवञ्च वेदस्य नासिका शिक्षा, मुखन्तु व्याकरणमिति बुध्यते । तस्मादेव साङ्गवेदमध्ययने कृते सति ब्रह्मलोकः सम्प्राप्यत इति भावः ।

**अनादिनिधना दिव्या वागुत्सृष्टा स्वयम्भुवा ।**

**आदौ वेदमयी दिव्या यतः सर्वा प्रभृत्तयः** (मीमांशकः, सन् २००३, भूमिकाखण्डः) **।।**

चत्वारि श्रृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्ता...४।५८।३ चत्वारि वाक्परिमितानि पदानि १।१६४।४५। उतत्वः पश्यन्नः ददर्श १०।७१।४ सुदेवोऽसि वरुण ८।९६।१२ एतेषां वैदिकमन्त्राणां व्याकरणमहाभाष्ये व्याकरणपरका व्याख्या संविहिता विद्यते। निरूक्तकारेणापि यास्केन चत्वारि वाक्परिमितानि इति मन्त्रव्याख्या कृता। अस्य परम्परा पुरातनी एव विद्यते।

**रामायणेऽपि नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**

**बहु व्याहरतानेन न किञ्चिदपभाषितम्** (वा.रा.किष्.का.३।३०)॥ श्रीरामः हनुमतः सुसंस्कृतां व्याकरणादिदोषरहितां भाषां संश्रुत्य लक्ष्मणं प्रति कथयति यद्, बहुव्याहरतापि हनुमता न क्वचिद् अपभाषितमनेन, सम्पूर्णमपि व्याकरणं सम्यगधीतमिति। त्रेतायुगस्यारम्भे व्याकरणशास्त्रस्य परम्परा व्यवस्थिता आसीदिति (मीमांशकः, २००३, पृ.५६)। अतः व्याकरणशास्त्रस्य मूलमेव वेदः। निरूक्तादिग्रन्थोल्लेखादपि व्याकरणशास्त्रप्राचीनता स्पष्टीभवति। वेदस्यानादित्वात् अपौरूषेयत्वात् व्याकरणस्यापि अनादित्वं सिद्ध्यति। वेदाङ्गेषु षट्स्वङ्गेषु प्रधानं व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति (शास्त्री, सन् २०१७, पृ.६)। व्याकरणस्य स्वरूपं कीदृशम् ? शब्दज्ञानं कथं कर्तुं शक्यते ? अध्ययनस्य प्रयोजनं किमित्यादिप्रश्नाः समुदिताः सन्ति। समाधानायाशो विहितः। व्याकरणस्वरूपज्ञानपूर्वकं व्याकरणाध्ययनप्रयोजनविषये ज्ञानम्, प्रधानाप्रधानप्रयोजनानां समाजे व्यवहारे च कथं विनियोग इत्यन्वेषणम्, विदुषां विविधमतानामध्ययनपूर्वकं विपुलविवेचनमनुसन्धानात्मकलेखस्योद्देश्यं वर्तते। व्याकरणस्वरूपज्ञानमस्य समौचित्यं वर्तते। तथा च भाषाव्यवहारं विना विश्वव्यवहार एवावरुध्यते। तेनोक्तं यथाः,

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते** (काव्यादर्शः, पृ. ४, १।४)॥

इति पद्येऽपि शब्दौचित्यं प्रकटीभवति। उक्तञ्च यथा, यदि शब्दनामकज्योतिना न दीप्येत समग्रसंसारेणैव अविद्याया अन्धकारे व्याप्तेन भूयेत। भाषापरिष्काराय, भाषासम्पादनाय, भाषाज्ञानाय च व्याकरणस्यावश्यकत्वं वर्तते। अतः व्याकरणस्य मूल्यमपि निर्धारयितुं शक्यते।

## समस्योद्देश्ये

व्याकरणाध्ययनप्रयोजनं किम् ? किमर्थं व्याकरणाध्ययनप्रयोजनम् ? एताभ्यामेव द्वाभ्याम् प्रश्नाभ्यां प्रकाशेते समस्योद्देश्ये। व्याकरणाध्ययनप्रयोजनादृते किं न भवति ? व्याकरणाध्ययनप्रयोजनानामावश्यकता किमर्थं वरीवर्ति ? इत्यादयः जिज्ञासाः समुद्भवन्ति। ताषां जिज्ञासानां शमनीकरणमेव उद्देश्यं वर्तते। अतः व्याकरणाध्ययनप्रयोजनम् एव गवेषणायाः समस्या तस्य सविवेचनं प्रस्तुतिप्रदानं उद्देश्यम् अस्ति। अनुसन्धानात्मकपत्रेऽस्मिन् व्याकरणस्य समासपरिचयादारभ्य व्याकरणाध्ययनप्रयोजनस्य मतमतान्तरपुरःसरं विपुलविवेचनमुल्लिखितं वर्तते।

## अध्ययनविधिः

अनुसन्धानमिदं मूलत निगमनात्मकविधिं विश्लेषणात्मकविधिञ्चाधृत्य कृतमस्ति। अस्मिन्ननुसन्धानेऽवलम्बितोऽध्ययनविधिर्यथाः-

### अनुसन्धानस्वरूपम्

अत्रालेखे आदौ समासेन व्याकरणस्य पुरावृत्तमुल्लिख्य महाभाष्यप्रयुक्तानां पञ्चानां मुख्यव्याकरणाध्ययनप्रयोजनानां सपरिचयं विवेच्यात्रैव गौणानां त्रयोदशानां प्रयोजनानां विवेचनं विधाय निष्कर्षः सम्पादितो वर्तते । तेनात्र वस्तुतः गुणात्मकपरिमाणात्मकानुसन्धानस्य लक्षणं घटते, अतः मिश्रितप्रकारयुतमनुसन्धानमस्तीति निश्चीयते।

### अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

सकलव्याकरणशास्त्रस्य प्रयोजनविषयमाधारीकृत्य विवेचनमत्र न सम्भवति। तेनात्र समासेन शाब्दशास्त्रं विशेषीकृत्य अन्यशास्त्रमतमप्यलम्ब्य विमर्शकरणमेव अस्य अनुसन्धात्मकलेखस्य सीमा विद्यते। पाणिनीयव्याकरणानुसारं व्याकरणस्य स्वरूपविवेचनमस्यानुसन्धानस्य विषयक्षेत्रं वर्तते। पाणिनी*याष्टाध्यायी-वैयाकरणसिद्धान्तकौमुदी-व्याकरणमहाभाष्य*दिव्याकरणनिर्वचनसम्बद्धग्रन्थान् समीक्ष्य व्याकरणाध्ययनस्य विवेचनमत्र विहितम्।

### तथ्यसङ्कलनन्तत्साधनानि च

अत्र पातञ्जलमहाभाष्यस्य समेषां प्रथमाह्निकाद्गौणमुख्यप्रयोजनानां सङ्कलनं कृतम्। पातञ्जलमहाभाष्यग्रन्थादेव उभयप्रयोजनसम्बद्धतथ्यानां सङ्कलनं कृतम्। प्रायः शास्त्रीयविषयसन्दर्भे मूलग्रन्था एव प्राथमिकस्रोतांसि भवन्ति। क्वचिद्द्वितीयकस्रोतसोऽपि तथ्यसङ्कलनं कृतम्।

### तथ्यविश्लेषणप्रकृया

अत्रानुसन्धानक्रमे सर्वप्रथमं व्याकरणमहाभाष्यस्य प्रथमाह्निकाद् व्याकरणाध्ययनप्रयोजनानां चयनं कृतम्। अत्र प्रसङ्गे सर्वप्रथमन्तु व्याकरणपदार्थं व्याख्याय व्याकरणाध्ययनस्य रक्षोहागमलघ्वसन्देहानां पञ्चानां मुख्यप्रयोजनानां सोदाहरणं विवेचनं कृत्वा त्रयोदशानामपि प्रकृतशैल्या विवेचनं कृतमस्ति। अन्ते च मुख्यगौणप्रयोजनानि व्यावहारिकपक्षेण साकं संयोज्य व्याख्यानं विधाय निष्कर्षः संस्थापितः ।

## सैद्धान्तिकाधारः

पाणिनीयव्याकरणे नव्यवैयाकरणैः प्रतिपादितानां व्याकरणसम्बद्धग्रन्थानां राद्धान्तविवेचनमेव सैद्धान्तिकाधारः स्वीकृतो वर्तते। अस्मिन् आलेखे पातञ्जलमहाभाष्यानुसारं व्याकरणाध्ययनस्य विवेचनात्मकाध्ययनं कृतमस्ति। अत

एवात्र पाणिनीयव्याकरणमेव मूलभूत-सैद्धान्तिकाधारः वर्तते। तत्र च *व्याकरणमहाभाष्यस्य* टीकानामप्यनुसन्धानस्य सैद्धान्तिकाधारत्वेन स्वीकृताः सन्ति। अनुसन्धानात्मकबाह्याभ्यन्तरसंरचनानिर्माणक्रमे आधारसन्दर्भप्रदर्शनाय बहुप्रचलितायाः एपिए (आङ्गलभाषायाम्) इति लेखनपद्धतेः प्रयोगः विहितः। सूत्रसन्दर्भप्रदर्शनाय संस्कृतवाङ्मयान्तर्गते व्याकरणशास्त्रे मौलिकपद्धतिस्वरूपेण बहुप्रचलितायाः अध्यायपादसूत्रसङ्ख्याप्रदर्शनपद्धतेः प्रयोगः समवलम्बितो वर्तते।

## विषयगतविश्लेषणम्

लेखेऽस्मिन् यथावश्यकं विभिन्नोपशीर्षकेषु विषयगतविश्लेषणङ्कृयते। तदर्थञ्च व्याकरणपदार्थं व्याख्याय समासेन व्याकरणशास्त्रस्येतिहासमुल्लिख्य पातञ्जलव्याकरणमहाभाष्यानुरूपं व्याकरणाध्ययनस्य मुख्यप्रयोजनानाङ्गौणप्रयोजनानाञ्च विश्लेषणङ्कृयते यथाः-

### व्याकरणपदार्थज्ञानम्

करणेऽर्थे व्याङ्उपसर्गपूर्वकात् कृञ्धातोः ल्युट्प्रत्ययो भवति। व्याक्रियन्त अर्था व्युत्पाद्यन्ते अर्थवत्तया प्रतिपाद्यन्ते शब्दा अनेनेति व्याकरणमिति कथ्यते। अस्माच्छब्दव्युत्पादनं भवति। शब्दार्थज्ञानाय शब्दोच्चारणाय अर्थज्ञानाय रूपसिद्धिप्रक्रियायै च व्याकरणस्यस्यावश्यकता भवति। वेदस्य षट्स्वङ्गेषु प्रधानमङ्गं व्याकरणं विद्यते। व्याकरणशास्त्रस्य लम्बायमाना परम्परा प्राप्यते। शिवेन्द्रवृहस्पतीनां पावितं व्याकरणमेतत्। पुरावृत्तज्ञानाय शम्भुपर्यन्तमन्वेषणं कर्तव्यमस्माभिः। ततः पाणिनिपूर्वाचार्याः, उत्तराचार्याः नाना मुनयः, भट्टोजिनागोजिनागेशादय आधुनिकवैयाकरणा अपि सन्ति। पाणिनिकात्यायनपतञ्जयः त्रिमुनीति नाम्ना परिचीयन्ते। तथैव वैदिकव्याकरणस्यापि निजविशेषता विद्यते। व्याकरणयोः लौकिकव्याकरणं प्रथितं वर्तते। एतत् प्रायोगिकं वर्तते। वस्तुतः व्याकरणशास्त्रं समृद्धं वर्तते। ब्रह्मा वृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः (मीमांशकः, सन् २००३, पृ.२७)। ब्रह्मणा बृहस्पतिः पाठितः, बृहस्पतिना इन्द्रः पाठितः, इन्द्रेण भरद्वाजः पाठितः, भरद्वाजेन ऋषयः पाठिताः ब्राह्मणाः ऋषिभ्यः पाठिताः सन्तीति प्राप्यते।

**समुद्रवद्व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतौ।**

**तद्भागभागाच्च गतं पुरन्दरे कुशाग्रबिन्दूत्पतितं हि पाणिनौ** (मीमांशकः, सन् २००३, पृ.३४)॥

इति पद्यानुसारं महेश्वरे व्याकरणज्ञानाब्धि आसीत्। बृहस्पतौ केवलं तस्यार्धमेव ज्ञानमस्ति। तस्यार्धभागव्याकरणज्ञानं पुरन्दरे आगतम्, चान्ते अल्पमेव पाणिनौ व्याकरणज्ञान प्राप्तमिति। अनेन महेश्वरोऽपि वैयाकरण आसीदिति ज्ञायते।

पतञ्जलिमहाभाष्ये व्याकरणपदार्थज्ञानविषये चर्चा कृता वर्तते। *व्याकरणमहाभाष्ये* 'लक्ष्यलक्षणे व्याकरणम्' इति उक्तं वर्तते। अत्र शब्द लक्ष्यम्, लक्षणञ्च सूत्रमस्ति। वस्तुतः लक्ष्यलक्षणयोः समुदायरूपे अर्थः लभ्यते। यतोहि अवयवे केवलं शब्दे सूत्रे च व्याकरणस्य पृथक् पृथक् व्याकरणपदार्थस्य प्रवृत्तिर्नभवति। सूत्रपाठकानां कृते अपि वैयाकरण शब्दस्य प्रयोगसामर्थ्यं दृश्यते। समुदायज्ञाने तु व्याकरणाच्छब्दान् प्रतिपद्यामहे इति शब्दज्ञानपरकव्यवहारो भवति। उदाहरणाय पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तम्, घृतं भुक्तम् इति (मिश्रः, सन् २००३,पृ.३४)।

**व्याकरणाध्ययनप्रयोजनम्**

*व्याकरणमहाभाष्ये* शब्दानुसारस्य चर्चायां प्रयोजनविषयेऽपि प्रश्न जागर्ति। ततः प्रयोजनानां विस्तृतं व्याकृतं भाष्ये। प्रयोजनं विना न मन्दोऽपि प्रवर्तते। तेन व्याकरणस्यापि मुख्यानुषङ्गिकभेदेन प्रयोजनानि सन्ति। पञ्च मुख्यप्रयोजनानि त्रयोदश गौणप्रयोजनानि च सन्ति। मुख्यानुषङ्गिकप्रयोजनैः व्याकरणप्रयोजनं स्पष्टीभवति। रक्षोहागमलघ्वसन्देहाः मुख्यप्रयोजनानि वर्तन्ते। तेऽसुराः....। दुष्टः शब्दः....। यदधीतम्....। यस्तु प्रयुङ्क्ते....। अविद्वांशः....। विभक्तिं कुर्वन्ति....। यो वा इमाम्....। चत्वारि....। उत त्वः....। सक्तुमिव....। सारस्वतीम्....। दशम्यां पुत्रस्य....। सुदेवोऽसीति त्रयोदश आनुषङ्गिकानि व्याकरणप्रयोजनानि सन्ति। मुख्यानुषङ्गिकयोरधः विवेचना विद्यते -

***रक्षा***

रक्षार्थं वेदानामध्येयं व्याकरणम् (मिश्रः, सन् २००३, पृ.८)। वेदरक्षायै व्याकरणस्याध्ययनं कृयते। व्याकरणे शब्दानां व्युत्पादनं भवति। तत्र प्रकृतिप्रत्ययानामध्ययनं भवति। शब्दार्थानामन्वेषणं भवति। तत्र शब्दरूपायनक्रमे लोपागमादेशवर्णविकारादिव्याकरणप्रक्रियायाः ज्ञानं व्याकरणवेत्तायामेव भवति। वैयाकरणाः वेदानं रक्षितुं शक्नुवन्ति। वेदरक्षायै साधनरूपाणि ज्ञानानि वैयाकरणैः साकं भवन्ति। व्याकरणं शब्दोच्चारणम्, शुद्धलेखनम् शुद्धपठनञ्च शिक्षयति। वेदेऽपि शुद्धाशुद्धिविषयः प्रधानभूतोऽस्ति। हस्तभ्रष्टः स्वरभ्रष्टो न वेदं फलमश्नुते (याज्ञवल्क्यशिक्षा, श्लो.२५) इति याज्ञवल्क्यशिक्षायाः श्लोकानुसारं शुद्धोच्चारणाभावे भ्रष्टस्वरप्रयोगे च वेदपाठफलमपि प्राप्तुं न शक्यते। वेदानां मन्त्राणामध्ययनेन जानाति, वैयाकरणः न भ्राम्यति। अतः वेदसंरक्षणाय व्याकरणस्याध्ययनमत्यावश्यकं वर्तते। वैयाकरणानां कृत एव वेदरक्षायै अधिकारः प्रदत्त इति भावः। व्याकरणाध्ययनाभावे 'जभार' 'देवा अदुर' इत्यादौ लोपागमवर्णविकारीदानां ज्ञानाभावेन अपरिपालिता वेदाः स्युः। एवञ्च वेदमन्त्राः सर्वाभिर्विभक्तिभिः सर्विलङ्गैश्च नोच्चारिताः भवन्ति अतः व्याकरणज्ञानं अत्यावश्यकं दृश्यते। व्याकरणप्रयोजनबोधाय मुख्यैरेव पर्याप्तमासीत् पुनः किमर्थं प्रयोजनमित्युक्ते मुख्यानि पूर्वोक्तानि इतः परं गौणानि प्रयोजनानि सन्तीति भावः। प्रयोजनमिदं रक्षणमिति शिक्षयति। जगतः सर्ववस्तूनि सार्थानि पूर्णानि च सन्ति तेषां रक्षणं कर्तव्यमिति च भावोऽत्पद्यते। अतो वेदरक्षणेन वेदज्ञानरक्षणेन पालनेन वा सर्वरक्षा सुनिश्चिता भवतीत्याशयः।

***ऊहः***

ऊहशब्देनात्र वेदे वचनादीनां परिवर्तनेऽन्वये च योग्यविभक्तीनां लिङ्गानां कल्पनमिति ज्ञायते। ऊहार्थञ्च व्याकरणमध्येयं भवति। अन्यत्र ऊहशब्देन तर्कानुमानविचारविमर्शपरीक्षणादीनामर्थोऽपि ज्ञायते। व्याकरणाध्येता एव कस्मिन् शब्दे क्व च कस्य लिङ्गस्य कस्या च विभक्तेश्च प्रयोगः कृयत इति जानाति। यज्ञे उदात्तानुदात्तस्वरादीनां सम्यक्प्रयोग अपेक्ष्यते। तत्र स्वरभङ्गादेवापि समस्या समायाति। यथायथं विपरिणमयितुं न शक्नोति अवैयाकरणः। मीमांशायां प्रकृतिविकृतिविषये सिद्धान्तो विद्यते। तत्र वाक्यानां सम्यक् प्रयोगेणैव यागकर्म सम्पत्स्यते। यागकर्मणि अस्य चर्चा प्रायशो भवति। तत्र प्रकृतियागस्य बहुचर्चा दृश्यते। प्रकृतियागे विनियुक्तमन्त्राणां देवतादिवाचकबोधाय 'ऊह' इत्यस्य प्रयोगः कृतो वर्तते। सर्वेष्टीनां दर्शपूर्णमासः प्रकृतिः, सर्वसोमयागस्याग्निष्टोम इत्युच्यते। यत्र इतिकर्तव्यस्य विषये उक्तं भवति सः प्रकृतियागः, यत्र प्रकृतिवद् विकृतिः कर्तव्या इति वचनेन प्रकृतियागात् ग्रहणे तु विकृतिर्भवति। प्रकृतियागस्य अग्नये त्वा जुष्टं निर्वपामि (शास्त्री, सन् २०१७, पृ.५) इति मन्त्रस्य अग्निशब्दः सौर्यं चरू निर्वपेद् ब्रह्मवर्चसकामः (शास्त्री, सन् २०१७, पृ.५) इति वचनानुसारं चतुर्थ्यन्तसूर्यशब्दं प्रयुज्य सूर्याय त्वा जुष्टं निर्वपामि इति मन्त्रेणाहुतिः दातव्या भवति। एषः प्रकृति ऊह वर्तते। विभक्तिलिङ्गौहा अपि सन्ति। देवीरापः शुद्धाः स्थः (शास्त्री, सन् २०१७, पृ.५) इत्यत्र स्त्रीलिङ्गौ जायते। अत्रैव विपरिणामे शुद्धः इति शब्दे शुद्धमित्यपि भवति। एतावता व्याकरणस्य गम्भीरयात्रा प्रचलति। अतः विभक्तिलिङ्गादीनां सुष्ठुप्रयोगाय यथायथं विपरिणयितुञ्च व्याकरणमध्येयं भवति। प्रकृतिप्रत्ययादीनामूहकरणशक्तिप्राप्तिरपि व्याकरणाध्ययनस्य फलम्। उचितानुचितविषयः सर्वत्र अपेक्षते। उचितानुचितपार्थक्यमपि प्रयोजनमिदं शिक्षयति।

***आगमः***

यच्छास्त्रं वेदमतस्यानुशरणं करोति स आगमः। आगमशब्देन वेद इति उच्यते। वेदव्यासस्यानुपमं पुस्तकमस्ति वेदः। वेद अपि व्याकरणप्रयोजनस्य प्रवर्तकः हेतुर्वा विद्यते। ब्राह्मणेन निष्कारणो षडङ्गो वेदोऽध्येयो ज्ञेयश्च (शास्त्री, सन् २०१७, पृ.९)। निष्कारणेन विप्रेण षडङ्गयुतः वेद अवगन्तव्य अध्येयश्च सदा। यद्यपि वेदपठनन्तु विप्रस्य कर्म अपि वर्तते। वेदस्य शिक्षा-कल्प-निरक्त-व्याकरण-ज्योतिष-छन्दांसीति षट्स्वङ्गेषु व्याकरणं प्रधानं मन्यते। प्रधाने च कृतो यत्नः फलवान् भवति (शास्त्री, सन् २०१७, पृ.१०)। वाक्यार्थज्ञानरूपफलाय च व्याकरणाध्ययनमावश्यकं वर्तते। अन्यत्रापि शब्दशास्त्रं वक्त्रं मुखं व्याकरणं प्रोक्तमित्यादिभिरूक्तिभिर्व्याकरणशास्त्रस्य प्राधान्यमावहति। यथा सर्वदेहे मुखं सर्वकार्यव्यवहारस्य प्रथमहेतुर्मुखमेव मन्यते। व्याकरणं शक्तिग्राहकं शास्त्रं वर्तते।

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**

**वाक्यस्य शेषाद्विवृत्तेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः** (मिश्रः, सन् २००६, पृ.१९६)॥ इति श्लोकानुसारं वृद्धजनाः व्याकरणं प्राधान्येन शक्तिग्राहकत्वेन स्विकुर्वन्ति स्म। वेदानां सर्वशब्दानामुच्चारणाय

शक्तिग्रहणाय च द्वारमेव व्याकरणमस्तीति अवगम्यते। वस्तुतः व्याकरणात्, उपमानात्, कोशात्, आप्तवाक्यात्, व्यवहारतः, वाक्यस्य शेषात्, महापुरूषाणां सामीप्यात् अर्थज्ञानं भवति। तेन ज्ञानस्यादिपरम्परायामपि व्याकरणव्याप्तिरासीदिति ज्ञायते।

***लघुः***

लघु इत्यनेन अल्पकालः ज्ञायते। व्याकरणेन लघुतायाः प्राप्तिर्भवति। शब्दज्ञानाय लघूपाय एव शिक्षयति व्याकरणम् । **"अल्पमात्रलाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः"** इति उक्त्यापि व्याकरणस्य वैशिष्ट्यं द्योतते। जगति अनन्ताः शब्दाः सन्ति। प्रत्येकशब्दानां ज्ञानाय दीर्घोपायः कठिनाय भवति। एतादृशीं समस्यां दूरीकर्तुं शक्नोति वैयाकरणः। अवैयाकरणस्तु शब्दार्णवे एव विलुप्तो भविष्यति। व्याकरणमेव सूत्रात्मकमस्ति। सूत्रद्वारा एव व्याकरणं समासाय प्रयतते। अल्पाक्षरत्वधर्मेण परिचीयते सूत्रम्। व्याकरणन्तु सूत्रसङ्ग्रहो वर्तते। पाणिनीयव्यवस्थायां प्रत्याहारविषयेनापि व्याकरणस्य लघूपायविचारः ज्ञायते। शब्दानां जातिव्यक्तिविचारेऽपि जातिपक्षमेवाश्रयते लघुत्वात्। अथ च बृहस्पतिः प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रं शब्दपारायणं प्रोवाच नान्तं जगाम (त्रिपाठी, सन् २०२२, पृ.६८)। इति उक्त्यनुसारेण भगवतापि नान्तं जगाम, मानवसन्दर्भे किमधुना यः चिरञ्जीवति स वर्षशतं जीवति ? शब्दानां प्रतिपदपाठे पठिते तु अध्ययनेनैव जीवनं समाप्येत। तेनैव उत्सर्गापवादादीन् परिकल्प्य प्रकृत्यप्रत्ययान् पृथक्कृत्य पठनमेवावश्यकमस्ति। तस्मात्कारणादेव ज्ञानग्रहणे सुगमतायै व्याकरणाध्ययनमतीव आवश्यकं वर्तते। एवञ्च सूत्रात्मकं सुकराय शीघ्राय चापेक्षयते। व्याकरणम् लघुत्वौचित्यमत्र शिक्षयति।

***असन्देहः***

संशयात्मा विनश्यति ( श्रीमद्भगवद्गीता, पृ.३७, श्लोक ४०)। संशयः विनाशमुखं दर्शयति। असन्देह इत्यत्र नञ्समासो वर्तते। अस्यार्थ अभावः। अभावश्चतुर्धा भवति, प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावश्चेति (तर्कसङ्ग्रहः, पृ.६)। अत्र प्रागभावः स्विकरणीयं भवति। यतोहि वास्तविकवैयाकरणाय सन्देहो न भवति। आधुनिकवैयाकरणदशानुसारन्तु प्रध्वंसाभावोऽपि निगदितुं शक्यते। परन्तु व्याकरणं सन्देहं दूरयति। विनाशाच्च रक्षति व्याकरणम्। वैयाकरणः सन्देहद्वारा कदापि पापसोढा न भवति। विनाशमुखाज्जीवितुं शब्दशास्त्रे सन्देहं विना योक्तुञ्च व्याकरणाध्ययनं कर्तव्यं भवति। तत्र यागकर्तारः स्थूलपृषतीमाग्निवारूणीमनड्वाहीमालभेतेति पठन्ति। प्रयोगेऽस्मिन् स्थूना चासौ पृषती च स्थूलपृषती वा स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति सन्देहः समुत्पद्यते। इत्थं सन्देहे जाते वैयाकरणः पूर्वपदप्रकृतिस्वरत्वात्बहुव्रीहीति समासान्तोदात्तत्वाच्च तत्पुरूषश्चेति अवगच्छति परमवैयाकरणः न शक्नोति पृथक्कर्तुमिति। वेदार्थे उदात्तानुदात्तस्वरिताः नियामकाः भवन्ति। मन्दबुद्ध्या वेदार्थः न कृयते। स्वरसंस्कारं विना अर्थं विना च वेदार्थः न ज्ञायते। स्वरसंस्कारः व्याकरणेनैव ज्ञायते। 'स्थूलपृषती' इति शब्दस्य अर्थसन्देहे जाते स्वरं निश्चित्यैव अर्थज्ञानं भवति। 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (पा.सू.६।२।१) इति सूत्रानुसारेण बहुव्रीहिसमासे स्वस्य पूर्वपदस्य उदात्तत्वं भवति शेषाः निघाताः भवन्ति। समस्तपदे एकाच् उदात्तः स्वरितश्च भवति शेषा अनुदात्ताः भवन्ति।

अत्र स्थूलशब्द अन्तोदात्तो वर्तते। पृषदा साकं समासः सञ्जातः। समस्तपदे एक एव स्वर अस्ति अतः 'पृषत्' इति निघातः मन्यते। 'समासे जाते उगितश्च' (पा.सू.४।१।६) इत्यनेन ङीप्प्रत्यये च जाते स्त्रीत्वविवक्षायां पृषती भवति निघातश्च। परन्तु स्थूल इति शब्दस्य ल (उदात्तः) इत्यस्य परे पृ(अनुदात्तः) इत्यस्य 'उदात्तादनुदात्तस्य स्वरितः' (पा.सू.८।४।५६) इत्यनेन स्वरितत्वं भूत्वा द्वौ शेषौ अनुदात्तस्य प्रचयत्वेन भवति। यतोहि वैयाकरणः समासविषये उदात्तादिस्वरविषये च जानाति, तेन सविधिः यज्ञमपि सम्पादयति, नावैयाकरणः। यज्ञसम्पादनाय शब्दप्रयोगे च असन्देहाय व्याकरणाध्ययनमपेक्षितम् अस्ति। वाक्यपदीयेऽपि,

**अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम्।**

**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते** (अवस्थी, सन् २०१६, पृ.११३, श्लोक १३)॥ इति पद्यद्वारा व्याकरणं विना तत्त्वावबोधो न भवतीति व्याख्यातं वर्तते। अर्थप्रकाशाय शब्दाः भवन्ति तत्तत्त्वज्ञानाय व्याकरणमपेक्ष्यते। इत्थङ्कारं जगति सर्वव्यवहारः शब्दमूलको भवति। शब्दं विना कश्चिदपि व्यवहर्तुं न शक्नुवन्ति। साधुत्वासाधुत्वशुद्धत्वार्थनिर्णयाय व्याकरणमावश्यकम्। तथा च **'एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवति'** उक्त्यापि व्याकरणस्य महत्त्वं ज्ञायते। तथा च व्याकरणभाष्यानुसारेण असाधुशब्दवाचकः पापवान् भवतीति पठ्यते च।

चरमे वेदानां रक्षार्थम्, स्वकर्तव्यज्ञानाय, सविधिः यागकर्मसम्पादनाय, लघुत्वसम्पादनाय सन्देहवारणाय पुण्याय, भाषापरिष्काराय, भाषाविकासाय च व्याकरणमध्येयं भवतीति आशयः।

एवञ्चात्र त्रयोदश आनुषङ्गिकानां प्रयोजनानामपि चर्चा कृयते यथाः

***तेऽसुराः....***

तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः ((त्रिपाठी, सन् २०२२, पृ.३०)। प्रथितदैत्यविषयः समुपस्थापितः। हे अरयः हे अरयः इति वक्तव्यमासीत् परं हेलय हेलय इति उच्चारितं यागकर्तृभिः। ततः पराजिता इति भावः। म्लेच्छनमिति अपशब्द उच्यते। भाषायां म्लेच्छनस्य निषेधो वर्तते। अपशब्दप्रयोक्ता मा भूम इति व्याकरणाध्ययनं कार्यमिति। वस्तुतः पाणिनीयव्याकरणानुसारन्तु 'हैहेप्रयोगे हैहयोः' (पा.सू.८।२।८५) इत्यनेन प्लुतकार्यं 'प्लुतप्रगृह्या अचि नित्यम्' (पा.सू.६।१।१२५) इत्यनेन प्रकृतिभावकार्यं कर्तव्यमासीत् परन्तु वाक्ये सूत्राप्रवृत्तिः कार्याप्रवृत्तिश्च सञ्जाता। अतः उचितसूत्रस्य कार्यस्य च प्रयोगाय व्याकरणमावश्यकमस्ति।

***दुष्टः शब्द....***

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्** (त्रिपाठी, सन् २०२२, पृ.३२)॥

प्रयोगेऽस्मिन् स्वरभङ्गेन जातं फलमुल्लिखितम्। स्वरदोषवर्णदोषअशुद्धशब्दैरिष्टार्थज्ञानं न भवति। कदाचित् अर्थहीनः शब्दः वक्रार्थ अशुद्धशब्दश्च वाग्वज्रतुल्यं भवति। यागकर्मणि विप्रमन्त्रशुद्ध्या यजमानहानिश्च भवितुं शक्नोतीति भावः। यथेन्द्रशत्रुः स्वरतोऽपराधात् (मिश्रः, सन् २००३, पृ.१२) इति भाष्यवचनादपि कथामाध्यमेन उदाहृतं वर्तते। सन्दर्भेऽस्मिन् पुराणकथा समायाति यथाः- पुरा मघवा विश्वरूपं त्वष्टापुत्रं वा जघान। ततः कुपितः त्वष्टा पुत्रघातकपुत्राजनये यज्ञं चकार। तत्र यज्ञे स्वाहेन्द्रशत्रुर्वर्धस्वेति मन्त्रोच्चारणं कृतमासीत्। वाक्येऽस्मिन् बहुव्रीहितत्पुरूषसमासयोरर्थभेदो वर्तते। तत्रेन्द्रामित्रत्वे सिद्धे सतीन्द्रन्स्य शत्रुर्भवेत्यत्रार्थे प्रतिपाद्येऽन्तोदात्ते प्रयोक्तव्य आद्युदात्त ऋतुजा प्रयुक्त इत्यर्थान्तराभिधानादिन्द्र एव वृत्रस्य शातयिता सम्पन्नः सञ्जातः। इन्द्रशत्रुत्वस्य च विधेयत्वात्सम्बोधनविभक्तेरनुवाद्यविषयत्वादिहाभावः। तेन दुष्टशब्दाद्दूरवसनाय च उपयुक्तशब्दज्ञानाय व्याकरणं पठन्तु इति भावः।

***यदधीतम्....***

**यदधीतमविज्ञातं निगदेनैव शब्द्यते।**

**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्** (मिश्रः, सन् २००३, पृ.१३)॥

एतत् प्रयोजनं अर्थाभावे शब्दज्ञानं व्यर्थं भवतीति शिक्षयति। यथा शुष्ककाष्ठं वह्निं विना न प्रज्वलति तथैव अर्थेन विना शब्दोच्चारणं अनौचित्यम् भवति। तथैव वाद्यवस्तु अपि ध्वनते परन्तु अर्थज्ञानं न भवति तद्वत् अनधीतार्थे शब्दाधीते सर्वं निष्फलं भवति। अतः अर्थरहितं ज्ञानं न गृह्णन्तु, अर्थज्ञानाय व्याकरणस्य प्रयोजनं वर्तते। व्याकरणमेव स्वरादिसंस्कारं शिक्षयति ततः अर्थप्रकाशाय सुकरं भवति। श्लोके 'अनग्नौ' इत्यत्र उपश्लेषरूपे आधारः प्रयुक्तः। उपश्लेषस्यार्थः सामिप्यमिति भवति। अत्र दारूकेण साकं संयोगाभावः सामीप्याभाव वा ज्ञायते। 'माधिगीष्महीं' इति इङ् अध्ययने धातोः लुङि उत्तमपुरूषस्य बहुवचने रूपमस्ति।

***यस्तु प्रयुङ्क्ते....***

**यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।**

**सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः** (मिश्रः, सन् २००३, पृ.१४)॥

यः कुशलः व्यवहारकाले विशेषे शब्दान् यथावद् प्रयुङ्क्ते, सः परत्र अनन्तं जयं प्राप्नोति। वाग्योगविद् अपशब्दैः दुष्यति। अस्मिन् व्याकरणप्रयोजने वाग्योगविदः महत्त्वं दर्शयति। वाग्योगविदपि उचिशब्दप्रयोक्ता एव भवति। स एव अनन्तविजयं प्राप्नोति। संसारे साध्वसाधुशब्दाः सन्ति। गवि च गोणीशब्दः साधर्म्यात्प्रयुक्तः साधुर्जातिप्रयुक्तस्त्वसाधुः मन्यते। परन्तु जगति बहव अपशब्दाः सन्ति कथं साध्वसाधु इति परिचयः सम्भव इति प्रश्नः जागर्ति। उपायस्तु यत्, यथा तण्डुलाः खाद्याः भवन्ति तत्र मिश्रिताः पाषाणखण्डा अखाद्याः स्वतः भवन्ति। इत्थमेव

प्रकारेण साधुशब्दज्ञानेन स्वतः असाधुशब्दाः पलायन्ते प्रयोगहीनाः वा भवन्ति। साधुशब्दज्ञानेन पुण्यञ्च भवतीति भावः। वाग्योगविदः परिचयधारणाय साधुशब्दज्ञानाय च व्याकरणप्रयोजनं विद्यते।

***अविद्वांशः....***

**अविद्वांशः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।**

**कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्** (मिश्रः, सन् २००३, पृ.१७)॥

अस्मिन् प्रयोजने अभिवादनक्रमे पुरूषसन्दर्भे स्त्रीसन्दर्भे च कथं कर्तव्यमिति विषये उक्तमस्ति। संस्कृतव्यारणे अभिवादनाय विशेषा व्यवस्था वर्तते। सा व्यवस्था पाणिनिकाले चासीत्। पाणिनीयसूत्रे च तस्य विषये सङ्केतो दृश्यते। प्रत्यभिवादनक्रमे पुरूषसन्दर्भे गुरूजनाः आशीर्वादक्रमे आयुष्मानेधि देवदत्त ३ इतिवत् अन्त्यस्वरे भवति। वैयाकरणः प्लुतविषये जानाति स्म। प्लुतयुतं वाक्यञ्च निर्मातुं शक्नोति परमवैयाकरणः न शक्नोति तात्कालिकसभ्यसमाजे च अप्रणम्य भवति स्म। स्त्रीवाचकशब्दे प्लुतकार्यं न भवति। स्त्रीवाचकशब्दे भावे च अभिवादये देवदत्तोऽहम् इति प्लुतरहितं वाक्यं भवति। अतः स्त्रीवन्मा भूम इति व्याकरणस्य प्रयोजनमस्ति। शास्त्रान्तरे मनुस्मृतौ अभिवादस्यविषये आभाणक इत्थम् -

**अभिवादात्परं विप्रो ज्यायांसमभिवादयन्।**

**असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्॥**

**नामधेयस्य ये केचिदभिवादं न जानते।**

**तान्प्राज्ञोऽयमहं ब्रूयात् स्त्रियः सर्वास्तथैव च** (पाठकः, वि.सं.२००४पृ.६८, श्लोक १२२,१२३)॥ ब्राह्मणः देवदत्तादि वा ज्यायांसं अभिवादनं कर्तुमिच्छति चेत् अभिवादये देवदत्तोऽहं भो इति वाक्यं वक्तव्यं भवति। परन्तु प्लुतविषयाज्ञानीनां कृते तु अयमहम् इति वाच्यम्। 'प्रत्यभिवादेऽशूद्रे' (पा.सू.८।२।८३) इति सूत्रानुसारं शूद्रविषयकं विना अन्यत्र टेः प्लुतं भवति। ततः आयुष्मानेधि देवदत्त३ इति आशीर्वादवाक्यं प्रत्यभिवादवाक्यं वक्तव्यं भवति। एतत्प्रयोजनं न केवलं व्याकरणाध्ययनप्रयोजनज्ञानं शिक्षयति अपि तु व्यवहारपरिमार्जनाय मार्गदर्शनञ्च करोति। अभिवादनप्रत्यभिवादविषयचर्चा अन्यपौरस्त्यनीतिष्वपि समुपलभ्यते।

***विभक्तिं कुर्वन्ति....***

अस्मिन् प्रयोजने प्रयाजमन्त्राः सविभक्तिकाः प्रयोक्तव्या इति निर्दिष्टिम्। प्रयाजमन्त्राः प्रकृतिविभक्तियुक्ताः भवन्ति। व्याकरणं विना प्रयाजमन्त्रानमध्येतुमसम्भवः। व्याकरणाध्येता एव प्रयाजमन्त्रान् सम्यक्तया उच्चारयितुं शक्नोति। व्याकरणादेव प्रयाजमन्त्राः पाविताः रक्षिताश्च भवन्ति। प्रयाजमन्त्ररक्षायै मन्त्रशुद्धिकरणाय च व्याकरणाध्ययनं कार्यमस्ति।

***यो वा इमाम्....***

प्रयोजनप्रतीकसूचकेऽस्मिन् आर्त्विजीनविषये चर्चितः। वेदे उदात्तानुदात्तस्वरादयः भवन्ति। तत्र प्रत्येकपदानां शुद्धोच्चारणं सस्वरं कर्तव्यं भवति। यः प्रत्येकपदानां सस्वरं शुद्धोच्चारणं प्रतिपदं प्रत्यक्षरञ्च उच्चारयति सः आर्त्विजो भवति। अतः प्रवीणार्त्विजनाः भवेम इति प्रयोजनमस्ति व्याकरणस्य।

***चत्वारि....***

**चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।**

**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश** (मिश्रः, सन् २००३, पृ.१८)॥

अस्य मन्त्रस्य प्रत्येकशब्दानां व्याकरणपरकार्थो वर्तते। मन्त्रे शब्दवृषभस्य कल्पना कृता वर्तते। चत्वारि इत्यनेन चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः ज्ञायन्ते। अन्यच्च परापश्यन्तीमध्यमावैखरीति चतसृणां वाणीनां संकेतोऽपि कृतः। त्रयो अस्य पादा इत्यनेन वर्तमानभूतभविष्यत्कालाः ज्ञायन्ते। द्वे शीर्षे इत्यनेन द्वौ शब्दात्मानौ नित्यः कार्यश्चेति। सप्त हस्तासो अस्य इत्यनेन प्रथमादि सप्तविभक्तीनां संकेतः वर्तते। त्रिधा बद्ध इत्यनेन त्रिषु स्थानेषु उरसि कण्ठे शिरसि च बद्ध इति ज्ञायते। अर्थात् वर्णानामुच्चारणे एतानि अङ्गानि प्रमुखानि भवन्तीति भावः। यथा वर्षा वर्षणं करोति तथैव वर्षणात् वृषभ इति उक्तः। अयमेव सर्वं फलं ददाति इत्यर्थः। रोरवीतीति शब्दं करोतीत्यर्थः। 'रू शब्दे' इत्यस्माद्धातोः रोरवीति निर्मीयते। अत्र 'महो देवो मर्त्यां आविवेश' इत्यस्य महान् शब्ददेवः मनुष्येषु प्रविष्ट इति भावः। अतः शब्देन साकं स्वस्य तादात्म्यं स्यादिति व्याकरणमध्येयमित्याशयः।

***उत त्वः....***

**उत त्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम्।**

**उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः** (शास्त्री, सन् २०१७, पृ.१३)॥

नवमेऽस्मिन् प्रयोजनप्रतीके वैयाकरणस्य शब्दज्ञानग्रहणसामर्थ्यं वेदऋचः सोदाहरणं प्रकटयति भाष्यकारः। पद्ये आलङ्कारिकप्रयोगः दृश्यते। पद्येऽस्मिन् त्वशब्दोऽन्यवाची, उतशब्दः शब्दस्यार्थे प्रयुक्तौ स्तः। 'उत उ' इति निपातसमाहारः। अवैयाकरणः दृष्टां वाचमपि द्रष्टुं न शक्नोति। श्रवणीयं ध्वनिमपि श्रोतुं न शक्नोति। अस्यामवस्थायां पशुपक्षीणां ध्वनिज्ञानाभाववत् आभाषो भवति। वैयाकरणं प्रति तु स्वयमेव वाणी आयाति वा वैयाकरणाय स्वस्वरूपं प्रकटीकरोति इत्याभिप्रायः पद्यस्य। उदाहरणद्वारेत्थं ज्ञापयति भाष्यकारः, यथा काचित् कामिनी स्त्री पतये धारितानि स्ववस्त्राणि उत्तार्य स्वशरीरं समर्पयति तथैव वाणी अपि वाणीस्वामिनं वा शब्दाभिज्ञं प्रति स्वस्वरूपं दर्शयति। अतः वयं वाचः योग्या भवेम, वाणीस्वरूपं अस्मभ्यं दर्शयेच्च व्याकरणं पठन्तु इति उक्तपद्यस्याशयो वर्तते।

***सक्तुमिव....***

**सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।**

**अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि** (शास्त्री, सन् २०१७, पृ.११४) ॥

पद्येऽस्मिन् साध्वसाधुशब्दपरीक्षणं कथं कृयत इति विषये सोदाहरणं विचारितम्। यथा जनाः सक्तून् तितउना (अमरकोषे पुंल्लिङ्गे प्रयुक्तेऽपि भाष्यवचनप्रमाणेन क्लीबे अपि तितउशब्दः साधुः ) पुनन्ति तथै वैयाकरणाः शाब्दिका वा बुद्ध्या परिमार्जयन्ति इति श्लोकस्याशयो भवति। वस्तुतः वैयाकरणाः प्रकृतिप्रत्यादीनां सम्यक् विचार्यैव शब्दानां साध्वसाधुपरीक्षणं कर्तुं प्रभवन्ति। वैयाकरणाः शब्दार्थयोरभेदज्ञानं भवति। अतः वैयारकणे प्रतिपाद्यविषयस्य ब्रह्मणः ज्ञानमपि भवति अतः सायुज्यमुक्तिर्भवति। यतोहि वैयाकरणेषु कल्याणमयी लक्ष्मी ( ब्रह्मरूपा प्रकाशिता) सदा तिष्ठति। सक्तूनां शोधनकार्यं कष्टयुतं भवति। तत्र अखाद्यानि सूक्ष्मवस्तूनि भवन्ति। तथैव व्याकरणेऽपि प्रकृतिप्रत्यादेशागमवर्णविकारविपर्ययादिद्वारा शब्दा शोधनीयाः भवन्ति तत्र प्रक्रिया विधिश्च दुष्करा भवति। तथापि शब्दार्थयोरेकत्वं व्याकरणविदः जानन्ति अर्थात् एकत्वज्ञानत्वेन तेषां ब्रह्मज्ञानपि सरलेनैव भवति। प्रश्नोत्तरशैल्या व्याख्या च कर्तुं शक्यते यत्, प्रश्नः एकत्वभावना क्व भवति ? उत्तरम् – द्वौ पन्थानौ भवतः, सुगमदुर्गमौ। स एव सरलमार्गः यः वेदरूपः वाणीविषयश्चासीत्, तत्रैव एकत्वभावना वर्तते। प्रश्नः प्राप्तसमज्ञानवन्तः के ? उत्तरम् – वैयाकरणाः। प्रश्नः समज्ञानं कथङ्कारं भवति ? वैयाकरणेषु सर्वभासकरूपा लक्ष्मी सदा वसति। सा एव अज्ञानदूरकरणाय समर्था भवति। अनन्तज्ञानेषु पूततमज्ञानाय च व्याकरणमध्येयमिति दशमप्रतीकस्याशयो वर्तते।

***सारस्वतीम्....***

वेदानुसारं यागकर्मणि अपि शुद्धशब्दानां वाक्यानाञ्च प्रयोगः कर्तव्यो भवति अन्यथा सर्वं पापाय भवति। तत्र असाधुशब्दाद्वार यज्ञे सम्पन्ने जाते तु सरस्वत्याः यज्ञकर्म कृत्वा पापशोधनं करणीयमस्ति। अतः प्रायश्चित्तीया मा भूमेति व्याकरणं पठितव्यमिति एकादश प्रतीकस्य भावो भवति।

***दशम्यां पुत्रस्य....***

याज्ञिकाः यज्ञनियमानुगामिनः पठन्ति यत्, दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यातद् घोषवदाद्यन्तरन्तः स्थमवृद्धं त्रिपुरूषानूकमनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठितमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम् (शास्त्री, सन् २०१७, पृ.१४)। वैदिकविधौ नवजातपुत्रस्य दशम्यां नामकरणं कृयते। तत्रापि नामकरणे नामपदस्यादौ घोषवर्णस्य प्रयोगः स्यादिति नियमो वर्तते। घोवर्गाणां तृतीयचतुर्थपञ्चमवर्णाः यरलवहवर्णाः घोषवर्णाः मन्यन्ते। तथा च नामपदे मध्यस्य व्यञ्जनवर्णः अःन्तस्थो भवति। नामपदस्य प्रारम्भिकवर्णाश्च वृद्धिसंज्ञकाः ( आ,ए.....) निषिद्धाः सन्ति। नामकरणाधिकारिणः नामपदे पितापितामहप्रपितामहानां कश्चित्नामांशोऽपि आवश्यकः। देवानां नाम्ना नामकरणञ्च स्यादिति नियमो वर्तते। नाम अपि दानवप्रतिष्ठायुतं न स्यात्, द्व्यक्षरं चतुरक्षरं वा स्यादिति। तदपि कृदन्ताक्षरं स्यात् न

तद्धितान्तमिति। नामकरणाय वैदिकविधिचिन्तनेन ज्ञायते यत्, पूर्वजा भाषाविज्ञाने सचेता आसन्। तेषां सूक्ष्मदृष्टेरपि सम्यक् परिचयः लभ्यते। अविचार्यैव नामकरणेन जिह्वाकर्णानां कृतेऽपि काठिन्यं भवतीति आशयः। शास्त्रज्ञानाय स्वपुत्रस्य पुत्र्या च सविधि शुद्धनामकरणाय व्याकरणशास्त्रं पठितव्यमिति विशिष्टोद्देश्यमस्य प्रयोजनस्य।

***सुदेवोऽसि....***

**सुदेवोऽसि वरूण यस्य ते सप्त सिन्धवः।**

**अनु क्षरन्ति काकुदं सूर्म्यं सुषिरामिव** (शास्त्री, सन् २०१७, पृ.१५)॥

इयं वरूणस्य स्तुतिर्वर्तते। वरूण त्वं सत्यदेवोऽ सि यतोहि त्वया साकं सप्त सिन्धवः सन्तीति पद्यस्य शाब्दिकार्थो भवति। सप्त सिन्धवः इत्यस्य सप्त विभक्तयः, काकुदमित्यस्यार्थः तालु इति। काकुर्जिह्वा, साऽस्मिदन्नुद्यत इति काकुदं भवति। शोभना ऊर्मी इति सूर्मी भवति। अनुक्षरन्तीत्यनेन शुद्धं करोतीत्यर्थः। यथा अग्निः प्रज्वलितायाः प्रतिमाया आभ्यान्तरे प्रविश्य मलं सन्दह्य शुद्धतां कारयति तथैव सप्तसिन्धुवत् सप्त विभक्तयः तालुप्रदेशे प्रविश्य तालुं प्रकाशयन्ति। यतोहि वरूण सत्यदेवोऽसि इति श्लोकार्थः। सुदेवाः स्यामेत्यध्येयं व्याकरणम्।

एवमेवान्येषामपि उद्धरणानां फलं बोध्यम्। बहिरङ्गशब्द-अपशब्द-प्रयोगविधि-निषेधविषयत्वेनैषामानुषङ्गिकत्वम् पद-पदार्थ-ज्ञानाधीनत्वेन अन्तरङ्गतया रक्षोहागमादीनां प्रधानत्वमिति नागेशादयः। अत एव एषां पञ्चानां प्रथमं त्रयोदशानां च पश्चादुपादानम् इति।

## कार्तज्ञ्यज्ञापनम्

लेखेऽस्मिन् व्याकरणमहाभाष्यग्रन्थाम्बलितानुसन्धानात्मकलेखनक्रमे सामग्रीसङ्कलने साञ्जालिकमार्गप्रदर्शने अनुसन्धानपत्रिकाप्रदाने भाषासम्पादने प्रविधिसाहाय्यप्रदाने विषयविश्लेषणाय स्वविचारप्रदाने नैकविधग्रन्थानवलम्ब्य व्याख्याविश्लेषणक्रमे बाह्याभ्यन्तररूपेण सक्रियेभ्यः मनसा कायेन धनेन च सहयोगदातृभ्यः ज्ञानदेभ्यो गुरूवर्येभ्यो हार्दिकं सधन्यवादं कार्तज्ञ्यं निवेदयामि।

## निष्कर्षः

जगद्व्यवहारे प्रयोजनं विना न किमपि प्रवर्तते । संस्कृतव्याकरणस्यापि किञ्चन स्वप्रयोजनमस्त्येव। पातञ्जलभाष्यस्य प्रथमाह्निके शब्दानुशासनचर्चासन्दर्भे शब्दस्वरूपज्ञाने व्याकरणस्य प्रयोजनविषये विस्तृतव्याख्यानं कृतमस्ति। भाष्यमुत्युक्ते व्याख्यानं विस्तृतलेखनमेव भवति अतः भाष्ये व्याकरणसम्बद्धविषयाणां भाष्यमेवास्ति। व्यारकणस्य वास्तविकं प्रयोजनन्तु शब्दानुशासनमस्ति परन्तु नवीनशैल्या तत्र व्याकरणस्य गौणमुख्यप्रयोजनानां प्रदर्शनं कृतं वर्तते। तत्र भाष्ये लौकिकवैदिकशब्दानां समासप्रस्तुतिपूर्वकं शब्दस्य वास्तविकस्वरूपं प्रदाय मुख्यामुख्यप्रयोजनानां सोदाहरणं विश्लेषणं कृतमस्ति। संस्कृतव्याकरणस्य सक्षोहागमलघ्वसन्देहाः इति पञ्च मुख्यप्रयोजनानि सन्ति। एवञ्च तेऽसुरा....। दुष्टः शब्दः....। यदधीतम्....। यस्तु प्रयुङ्क्ते....। अविद्वांशः....। विभक्तिं

कुर्वन्ति....। यो वा इमाम्....। चत्वारि....। उत त्वः.....र। सक्तुमिव....। सारस्वतीम्....। दशम्यां पुत्रस्य....। सुदेवोऽसीति त्रयोदश आनुषङ्गिकानि व्याकरणप्रयोजनानि सन्ति। प्रयोजनेषु वेदरक्षायै, यागकर्मसु, शुद्धाशुद्धशब्दपरीक्षणाय, शब्दानां लघुत्वसम्पादनाय, वाक्यनिर्माणे बोधे च सन्देहनिवारणाय, भाषापरिष्काराय,अर्थज्ञानाय विपरीतफलाज्जीवितुं शब्द-निपात-प्रकृति-प्रत्यय-क्रिया-धातुप्रभृतीनां सम्यक् ज्ञानाय च व्याकरणस्यौचित्यं दरीदृश्यते। प्रयोजनेन कस्यचन वस्तुनः विषयस्य च महत्त्वं ज्ञायत एव। व्याकरणस्य सर्वप्रयोजनेन च व्याकरणस्य महिमानं ज्ञातुं सुकरं भवति। व्याकरणस्य प्रयोजनज्ञानेन मनुष्यः विचार्यैव कार्य करिष्यति। यः लिङ्गं विभक्तिञ्च विचार्य सुस्थाने प्रयुङ्क्ते, यः यागकर्मणि उदात्तादिस्वराणां समुचितरूपेण प्रयुङ्क्ते, यः बहुव्रीह्यादिसमासानामुपयुक्तप्रयोगं करोति, यः अपशब्दान् निवार्य साधुशब्दानेव युङ्क्ते, यश्च भाषाप्रयोगे, लेखने, पठने, उच्चारणे च सर्वत्र प्रयोगे उच्चारणे भाषाविषयकसन्दर्भे व्याकरणनियममनुशेते सः वैयाकरण अस्ति, व्याकरणप्रयोजनज्ञाता अस्तीति अनुमातुं शक्यते। प्रयोजनेनैव व्याकरणस्याधिकारी अध्ययनाय नितरां प्रवर्तते। तस्मादपि व्याकरणस्य प्रयोजनानामध्ययनं विश्लेषणं विमर्शनञ्चावश्यकं वरीवर्ति। अभिनवव्याकरणप्रवेशेच्छुकानां कृते अनुसन्धानात्मकालेखोऽयं उपयोगी वर्तते। व्याकरणशास्त्राय सर्वे प्रवर्ततामित्याभिप्रायमवलम्ब्य आलेखोऽयं संरचितः। भाषणे शुद्धलेखने च आपतिताः समास्याः दूरयितुं समर्थो भविष्यतीति लेखोऽयमिति आशामपि नितराम् आवहति। चरमे च पातञ्जलमहाभाष्यस्य व्याख्यानेन, विवेचनेन, *ऋग्वेदस्थपद्यैः*, *व्यारकणस्येतिहासग्रन्थ*सहाय्येन, व्याकरणसम्बद्धनानाग्रन्थैश्च व्याकरणप्रयोजनाध्ययनस्य निष्कर्षः सम्पादितः वर्तते।

## सन्दर्भसामग्रीसूची

अन्नम्भट्टः, (विं.सं.२०७८), *तर्कसङ्ग्रहः,* (सम्पा.डा.विश्वनाथ धिताल), नेपालः महेशसंस्कृतगुरुकुलम्।

अवस्थिः, शिवशङ्करः **(**सन् २०१७**)**, *वाक्यपदीयम्,* चौखम्बाविद्याभवन।

त्रिपाठी, जयशंकरलालः (वि.सं २०२२), *व्याकरणमहाभाष्यम्,* चौखम्बा–कृष्णदास–अकादमी।

दण्डी, (सन् १९३८), काव्यादर्शः, (पण्डित रङ्गाचार्य रद्दी शास्त्री), भण्डारक ओरिएन्ट इन्स्टिच्युट।

पाठकः, श्रीगणेशदत्तः (सन् २००२), *मनुस्मृतिः,* श्रीठाकुरप्रसाद पुस्तक भण्डार।

पाठकः, श्रीशङ्करदेवः (सन् २०००), *अष्टाध्यायी,* गुरुकुलवृन्दावनस्नातकशोधसंस्थानम्।

मीमांशकः, युधिष्ठिरः (सन् २००३), *संस्कृत व्याकरणका इतिहास,* चौखम्बा विद्याभवन।

मिश्रः, मधुसूदनप्रसादः (सन् २००४), *व्याकरणमहाभाष्यम्,* चौखम्बा विद्याभवन।

मिश्रः, वंशीधरः (सन् २००६), *परमलघुमञ्जूषा,* चौखम्बा विद्याभवन।

याज्ञवल्क्यः, (वि.सं.२०८१), *याज्ञवल्क्यशिक्षा,* तनहूँ महेशसंस्कृतगुरुकुलम्।

वाल्मीकिः, (इ.१९४८), *रामायण,* नवलकिशोर प्रेस।

व्यासः, (इ.१९०८), *रामायण,* (सम्पा.महावीरप्रसाद द्विवेदी) कानपुर प्रेस।